International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(5): 273-275
© 2020 IJSR
www.anantaajournal.com
Received: 03-06-2020
Accepted: 09-08-2020

**पपि वसाकः**
सहशिक्षिका, दूर्गापुर वालिका विद्यालय, पश्चिम बंगाल भारत।

# महाभारते राजनैतिकप्रसङ्गः

पपि वसाकः

**प्रस्तावना**

भारतवर्षः एकः वैचित्र्येण समृद्धशीलः परिपूर्णः देशः। एतस्य साहित्यवाङ्मयम् अतीव विशालमयमस्ति। भारतस्य प्राचीनसाहित्यस्य सम्पूर्णज्ञानं निहितमस्ति केवलं महाभारते, अतः

**धर्मे चार्थे च कामे च मोक्षे च भरतवर्षभ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्॥** [1]

इति सुक्तिः प्रसिद्धिः वर्तते अस्मिन् प्रवर्त्तिते लोकाचारे। अस्मिन् महाभारते यद्यपि सर्वेषु पर्वषु राजधर्म इत्यस्य वर्णना अस्ति तथापि शान्तिपर्वणि राजधर्मस्य सम्बद्धविषयः अधिकतया अस्ति। वस्तुतः महाभारते राज्यानुशासनसम्बद्धानां ज्ञातव्यविषयानां भाण्डारः अस्ति। महाभारतं न केवल एकम् ऐतिहासिकग्रन्धमपि तु विश्वसाहित्यस्य एकः निबन्धः अस्ति। विशेषतया धर्मशास्त्रम्, अर्थशास्त्रम्, कामशास्त्रम् च इति एतेषां स्रोतस्वरूपिणी धारा महाभारते एव प्रवाहिता भवति। अतः उच्यते—

**अर्थशास्त्रमिदं प्रोक्तं धर्मशास्त्रमिदं महत्।**
**कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना॥** [2]

महाभारतस्य आदिपर्वणि दण्डनीतिः, राजधर्मः, शासनपद्धतिः, करव्यवस्थादीनां विषयाः निबद्धाः सन्ति। ये विषयाः महाभारतकारेण भीष्मस्य मुखात् उद्घाटिताः। अस्य रचना द्वापरयुगस्य अन्तिमसमये अर्थात् कलियुगस्य प्रारम्भे एव अभवत् इति गवेषकैः विद्वद्भिः च आविष्कृता। आदौ ८००० श्लोकैः महाभारतस्य रचना महर्षिव्यासेन '**जय**' नाम्ना कृता। अनन्तरं २४००० संख्याभिः श्लोकैः महाभारतस्य रचना '**भारत**' नाम्ना अभवत्। अस्मिन् पर्याये महाभारते उपाख्यानाभाववशात् महाभारतं शुद्धग्रन्थरूपेण मान्यता दत्ता। [3] ततः परं शनैः शनैः १००००० श्लोकैः अयं ग्रन्थः '**महाभारत**' मिति आख्यया साहित्यसमाजे प्रसिद्धिं प्राप्नोति। संस्कृतसाहित्ये सर्वप्रथमः महाभारतस्य उल्लेखः मिलति आश्वलायनगृह्यसूत्रे। [4] अनन्तरं सांख्यायन-श्रौतसूत्रे अपि महाभारतस्य उल्लेखः मिलति। [5]

महाभारते राजनैतिकविचारविषयं भीष्मः युधिष्ठिरं बोधयति। महाभारते राजनैतिकविचारः तथा प्रशासनं चालयितुं प्रस्तुतराजसंस्थानां विवरणं अधोलिखित सरण्या प्रकाशते—

**१. शासनस्य उद्भवः-** भीष्मस्य मुखात् निर्गतः शासनोद्भवः सम्बद्धः विचारः शान्तिपर्वणि विस्ताररूपेण अस्ति येन सिद्धान्तद्वयम् अभिव्यक्तं भवति इति—

**क. दैवीसिद्धान्तः** सत्ययुगे राज्यमपि न आसीत्, न राजा इति भीष्मः युधीष्ठिरं कथयति। सर्वे जनाः धर्मस्य पालनवशात् परस्परं रक्षणं कृतवन्तः। [6] अनन्तरं धर्मलोपात् कलहः सञ्जातः, यज्ञादिनां कार्यक्रमः स्थगितः भवति।

Corresponding Author:
**पपि वसाकः**
सहशिक्षिका, दूर्गापुर वालिका
सहशिक्षिका, दूर्गापुर वालिका विद्यालय, पश्चिम बंगाल भारत।

---

1 **महाभारतम्, आदिपर्वणि ६२/५३, स्वर्गारोहणपर्वणि ५/५०।**

2 **महाभारतम्, आदिपर्वणि २/३८३।**

3 **मिश्र, कामेश्वर नाथ, महाभारत में लोक कल्याण की राजकीय योजनाएँ, पृ. १३।**

4 **आश्वालायन गृह्यसूत्रम्, ३/४/४ में भारत तथा महाभारत का उल्लेख है।**

5 **काले, त्र्यम्बक गुरुनाथ, दि वैदिक मैगजीन एण्ड गुरुकुल समाचार, भाग ६-७, पृ. ५२८-५३२।**

6 **महाभारतम्, शान्तिपर्वणि १४.५९।**

देवः ब्रह्मणः समीपं गतः। देवतानां प्रार्थनाम् अङ्गीकृत्य ब्रह्मदेवः १००००० अध्यायैः दण्डनीतिः आविष्कृता। [7] तदनन्तरं स्वयं ब्रह्मदेवः मानसपुत्रं विरजसं पृथिव्याः अधिपतिः इति घोषणां कृत्वा दण्डनीत्या राज्यशासनं कर्तुं आदिष्टवान् इति। भीष्मस्य मतानुसारेण राजा भूमिपः भवति, राजा नररूपी देवता भवति अतः राजा साधारणप्रजाभिः न अग्राह्य [8]। अतः महाभारते उक्तम् अस्ति—

**न जात्ववमन्तव्यो मनुष्य इति भूमिपः।**
**महती देवता ह्येषा नररूपेण संस्थिता [9]॥**

**ख. अनुबन्धसिद्धान्तः—** मात्स्यन्यायेन पीड़ितैः मनुष्यैः सदाचारणसम्बद्धनियमः प्रस्तुते सत्त्वेऽपि उत्तमरीत्या तत् न परिपालनेन ते असहायाः पीड़िताः ब्रह्मदेवस्य समीपं गतवन्तः। ब्रह्मणः इच्छानुसारेण मनुः राजा भवति, [10] अनन्तरं शासनकार्यम् उत्तमरीत्या चलति। राज्ये ये अधिकारस्य दुरुपयोगं कुर्वन्ति ते पदच्युताः भविष्यन्ति इति।

**२. राज्यस्य अवयवानि—** राज्यानुशासनं चालयितुं राज्ये सप्तानामङ्गानाम् आवश्यकम् अस्ति इति भीष्मः वदति। ते च यथा— आत्मा(राजा), अमात्य(मन्त्री),कोषः, दण्डः(सैनिकः), मित्रम्, जनपदम्(राष्ट्रम्), पौरः (राजधानी) [11]।

**क. राजा—** राजा राज्यस्य अधिपतिः भवति इति हेतुना शङ्कया राज्ञः आदेशः परिपालनीयः इति प्रजाः सुशृङ्खलया जीवनयापनं कुर्वन्त्येव। अनेन राज्ये सुव्यवस्था तिष्ठति। [12] प्रजायाः रक्षणार्थम् राज्ञा राज्ये दण्डविधिः विधातव्या, परन्तु राजा स्वेच्छाचारी न भवेत्। राजधर्मं कश्चन उलङ्घति चेत् सः अवश्यमेव दण्डनीयः। राजनि एते गुणाः अवश्यमेव भवेयुः।–

**पराक्रमी, सत्यवादी, क्षमाशीलः, इन्द्रियजयी, धर्मार्थकाममोक्षेषु रतः, दानशीलः, युद्धविद्यायां प्रवीणः, ज्ञानी, उदारः इति एते गुणाः तिष्ठेयुः।**

राज्ञः मनसि निर्दिष्टरूपेण एते एव सप्त इच्छाः न उदेयुः।–

**मृगया, मद्यपानम्, द्यूतक्रीडा, स्त्रियं प्रति आसक्तिः, वाक्पारुष्यः, दण्डपारुष्यः, अर्थदूषणम्।**

उत्तमराज्ञः राज्ये प्रजाः तादृशं भ्रमन्ति यादृशं पुत्रः स्व पितुः गृहे भ्रमति। [13] अतः महाभारते उक्तमस्ति—

**पुत्रा इव पितुर्गेहे विषये यस्य मानवाः।**
**निर्भया विचरिष्यन्ति स राजा राजसत्तमः॥** [14]

अतः राज्ञः सर्वदा आत्मनियन्त्रणबलेन स्वयं नियन्त्रितः भूत्वा सर्वदा प्रजानां कल्याणाय रञ्जनाय च संलग्नः भवेत्।

महाभारते राज्यस्य राजा वंशानुक्रमिकः भवेत इत्यपि सूचयति महाभारतकारः। पुत्रेषु ज्येष्टपुत्रः राजा भवेत, अतः महाभारतस्य सभापर्वणि युधिष्ठिरस्य राज्याभिषेकस्य वर्णनं तथैव दृश्यते। यदि ज्येष्टपुत्रः विकलाङ्गः भवति तर्हि वयः क्रमानुसारेण राजगुणयोग्यानुसारेण उपयुक्तमानः पुत्रः राजा भवेत्।

मन्त्रीपरिषदः ३७ सदस्यैः राजसिंहासनम् अधिकर्तुं राजा निर्वाचितः भवति। ते सदस्याः यथा—

**चत्वारः ब्राह्मणाः, अष्टौ क्षत्रियाः, एकविंशतिः वैश्याः, चत्वारः शुद्राः च।** [15]

**ख. मन्त्रीपरिषद् राजकर्मचारी च—** मन्त्रीपरिषदि चत्वारः ब्राह्मणाः, अष्टौ क्षत्रियाः, एकविंशतिः वैश्याः, चत्वारः शुद्राः, एकः सूतः च इति एते सदस्यत्वेन निरताः तिष्ठन्ति। प्रजासु वैश्यानां सख्याधिक्यवशात् मन्त्रीपरिषदि अपि एतेषां आसनं बहु अस्ति। एते मन्त्रिणः **वंशजाः, स्वदेशजाः, रूपवन्तः, बुद्धिमन्तः, बहुश्रुताः, प्रगल्भाः, अनुरक्ताः, सहनशीलाः, सुशिक्षिताः, शास्त्रेषु निपुणाः, कृतज्ञाः, जितन्द्रियाः, निर्लोभीजनाः, आलस्यरहिताः, संयमीशीलाः, विनयशीलाः, मृदुभाषिणः,धीराः, वीराः, इत्यादयः गुणसम्पन्नाः भवेयुः।** [16] एतेषां मन्त्रिणां एकमेव कार्यं— राजकार्ये प्रजानां संरक्षणाय राजकर्म सरलसहजोपायेन विधातुं राज्ञः कृते सुमन्त्रणाप्रेरणम्।

अन्तः पुरे **राजगुरुः** अपि आसीत्। कस्मिनश्चित् कार्ये यस्य परामर्शं स्वीकृत्य राजा मन्त्रीपरिषदि आलोचनाचक्रे तत् परामर्शं प्रकाशयति।

**ग. विधिनिर्माणम्—** राजकीयनियमनिर्माणाय तन्नियमपरिपालनाय च विधिद्वारा निर्मितः एकः प्रशस्तः मार्गः अपेक्षते। सः मार्गः न्याय-व्यवस्थारूपेण राज्ये सर्वैः जनैः ग्रहणं क्रीयते। **सर्वैः सह समभावापन्नः** इति इयं पद्धतिः सर्वेषां कृते अनया न्यायव्यवस्थया कार्यकरी भवति। भीष्मस्य मतानुसारेण विधेः चत्वारि स्रोतांसि भवन्ति— **ब्रह्मा, ऋषिः, लोकः, संस्था** च।

आदौ विधाता स्वयं ब्रह्मा विधेः रचनां कृतवान्। देवतानां प्रार्थनामङ्गीकृत्य ब्रह्मा १००००० अध्यायैः दण्डनीतीः रचितवान्। अस्मिन् मानवकल्याणाय नियमाः निर्धारिताः।

अनन्तरं देश-काल-परिस्थित्यनुसारेण च ऋषयः विधिन् नियमेण परिवर्तनं कृत्वा प्रायश्चित्तस्य विधानम् अकुर्वन्। शान्तिपर्वणि केषाञ्चित् ऋषिणां नामानि तत्र उल्लिखितानि सन्ति। [17]

**घ. कोषः—** राजकोषः प्रजाभ्यः प्राप्तकरेण परिपूर्णः आसीत्। राजकोषात् धनं सर्वदा प्रजानां हितायः व्ययम् अभवत्। सचेष्टापूर्वकं राज्ञा कोषस्य वृद्धिः करणीयः एव। येन राज्यं बहिर्देशीयराज्ञः हस्तात् रक्षितुं सैनिकानां नियोगः अतिरिक्तमात्रेण भवेत्।

कोषस्य वृद्ध्यर्थं राजा स्वच्छन्दविचरणकारी न भवेत्। प्रजाभ्यः करः तथैव ग्रहीतव्यः यथैव भ्रमरः पुष्पात् मधु गृह्णाति। अतः महाभारते उक्तम् अस्ति—

**मधुदोहं दुहेद् राष्ट्रं भ्रमरा इव पादपम्।**
**वत्सापेक्षी दुहेच्चैव स्तनांश्च न विकुट्टयेत्॥** [18]

**ङ. दूतः गुप्तचरश्च—** राज्यानुशासनं सुष्ठुतया चालयितुं राज्यस्य अभ्यन्तरे बहिः च समाचारं ज्ञातुं दुतस्य गुप्तचरस्य नियुक्तिः अभवत् इति महाभारतात् ज्ञायते। दूतः कुलीनः, वाग्मी, प्रियवक्ता, दक्षः, सत्यवादी, स्मृतिशीलः भवितव्यः। [19] सर्वकारीयसेवकानां, सामन्तानां, प्रजानां मनोभावनं ज्ञातुं गुप्तचराणां नियुक्तिकरणम् अभवत् तस्मिन् समये। प्रतिवेशि-राज्यस्य शक्तिः, निर्बलता, शत्रु-मित्रभावः इति एतान् विषयान् ज्ञातुं दक्षगुप्तचरस्य नियुक्तिकरणम् अभवत्।

---

[7] **महाभारतम्, शान्तपर्वणि २२.७९।**
[8] **महाभारतम्, शान्तिपर्वणि, ६८/४०।**
[9] **महाभारतम्, शान्तिपर्वणि, ६८.४०।**
[10] **महाभारतम्, शान्तिपर्वणि, २१/६७।**
[11] **महाभारतम्, शान्तिपर्वणि, ६४-६५।**
[12] **महाभारतम्, शान्तिपर्वणि, ८/६८।**
[13] **महाभारतम्, शान्तिपर्वणि, ५७/३३।**
[14] **महाभारतम्, शान्तिपर्वणि, ५७/३३।**
[15] **महाभारतम्, शान्तिपर्वणि, ८५/७-९।**
[16] **महाभारतम्, शान्तिपर्वणि ११८/७-१५**
[17] **महाभारतम्, शान्तिपर्वणि २३/५८।**
[18] **महाभारतम्, शान्तिपर्वणि ८८/४।**
[19] **महाभारतम्, शान्तिपर्वणि ८५/२५-२९**

**च. अधिकारी वर्गः—** शासनसञ्चालनं सुचारुरूपेण चालयितुं महाभारते १८ अधिकारिणः आसन् ये **तीर्थ** नाम्ना परिचिताः आसन् । [20] ते च यथा—

**मन्त्री, पुरोहितः, युवराजः, चमूपतिः, द्वारपालः, अन्तर्वेशिकः, कारागाराधिकारी, द्रव्यसञ्चयनकारी, कृत्याकृत्यविनियोजकः, प्रदेष्टा, नगराध्यक्षः, कार्यनिर्माणकारी, धर्माध्यक्षः, सभाध्यक्षः, दण्डपालः, दुर्गपालः, राष्ट्रान्तपालः, अटवीपालः च इति।**

**छ. सैन्यः युद्धव्यवस्था च—** महाभारते सैन्यस्य अनेकपर्यायवाचिशब्दः मिलति। यथा **अनीकः, दण्डः** [21]**, वाहिनी** [22]**, कटका** [23] **दयः** च। बहुषु स्थलेषु **चतुरङ्गः** [24] इति अयं शब्दः अपि मिलति। भारतीययुद्धकलायां सैनिकानां चत्वारि अङ्गानि सन्ति इति— तानि च **पदातिकसैन्यः, अश्वारोहीसैन्यः, गजारोहीसैन्यः, रथारोहीसैन्यः च।** एतेषां सैन्यानां समूहः **'सेना'** [25] इति उच्यते। आश्रमवासिपर्वानुसारेण सैन्यः पञ्चप्रकाराः भवन्ति— **मौलः, भृतकः, श्रेणी, मित्रम्, अटवी** [26] **च।** किन्तु सभापर्वणि सैन्याः चत्वारः भेदाः भवन्ति इति उक्तम्।– **मौलः, भृतकः, मित्रम्, अटवी च।** [27] महाभारते **आन्तरिकाव्यवस्थायाः, मात्स्यन्यायात्, बाह्य-आक्रमणात्** प्रजाः रक्षितुं तथा **चक्रवर्ती सम्राट्** भवितुं सैन्यस्य आवश्यकता आसीत्। [28]

भीष्ममतानुसारेण युद्धं प्रकारद्वयेन सिद्ध्यति—

प्रकाशयुद्धम् अप्रकाशयुद्धञ्च। प्रकाशयुद्धे योद्धारः सैन्याश्च परस्परं सम्मुखीनः युद्धं कृतवन्तः, अप्रकाशयुद्धं तु जङ्गम-अजङ्गमचूर्णयोगेन, विषयुक्तभोजनेन, विषयुक्तवस्त्रेण च अभवत्।
महाभारते युद्धं व्यूहरचना द्वारा अपि अभवत्। महाभारते व्यूह-प्रक्रियानां नामानि अपि दृश्यन्ते, यथा—
सूचीमुखम्, गरुडः, क्रौंचः,मकरः, मण्डलः, शृङ्गारकः, सर्वतोभद्रः, शङ्कवः, चन्द्रः, चक्रम्, मिश्रादयः व्यूहरचनाः तत्र दृश्यन्ते [29]।
प्राचीनभारतीयराजनीतिशास्त्रम् न केवलं महाभारते, अपि तु मनुसंहितायाज्ञलक्ययोः मध्ये अपि दरिदृश्यते। कौटिल्यः अर्थशास्त्रम् अपि एकं प्रसिद्धं राजनीतिशास्त्रम् अस्ति। कामन्दकनीतिसारः अस्मिन् विषये उल्लेखनीयः। एतेषां शास्त्राणां बहु गभीरतया अध्ययनेन प्राचीनार्यजात्याः विविधक्रियाकलानां सांस्कृतिकः, धार्मिकः, राजनीतिकः, दार्शनिकः, प्रशासनिकः, आर्थिकादिनां गतिविधिनां गहनरूपेण परिचयः मिलति।

**सन्दर्भग्रन्थसूची—**


1. प्राचीन भारत की प्रशासनिक एवं राजनीतिक संस्थायें, श्रीसरस्वतसदन, नई दिल्ली, 1998
2. प्राचीन भारतीय राज्यानुशासन्, ज्योति इन्टरप्राईजिज, 2009
3. महाभारत मे विज्ञान दर्शन और समाज, अभिषेकप्रकाशन,2008
4. रघुवंशम्
5. महाभारतम्


---

[20] **महाभारतम्, सभापर्वणि, ५/३८**
[21] **महाभारतम्, शान्तिपर्वणि ४०/५९।**
[22] **महाभारतम्, आदिपर्वणि २/१९।**
[23] **महाभारतम्, सभापर्वणि २४/१२।**
[24] **रघुवंशम्, ११/१६।**
[25] **श्यामसुन्दर दास, हिन्दी शब्द सागरे 'सेना' इत्यस्य अर्थः।**
[26] **महाभारतम्, आश्रमपर्वणि ७/७-१२**
[27] **महाभारतम्, सभापर्वणि ५/६३**
[28] **महाभारतम्, शान्तिपर्वणि ६७/४-६**
[29] **महाभारतम्, भीष्मपर्वणि, १९/४,७५/६-१२, द्रोणपर्वणि, ७/२४, १८/१।**